

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

त्पर्यः सर्वाणि चिदचिद्वस्तूनि सूक्ष्मदशापन्नानि स्थूलदशापन्नानि च परस्य ब्रह्मणो लीलोपकरणानि सङ्कल्पयन्
लेतिभगवत् बादरायण पराशरादिभिरुक्तं प्रत्यक्षादिविरोधात् परिणामर्द्धिसंयुक्तं क्रीडाहेतुं सर्वेश्वरमित्युप
क्रीडतो बालकस्येव चेष्टा तस्य निष्प्रयोजनाप्रयोजनाऽनैकरिवेत्यादिभिः वक्ष्यति च लोकवत्तु लीलाकैवल्यमिति प्र
ह्लादनाद्यैश्वर्यजन्तुविश्वमितत् तस्मिंश्चानोपायया सन्नियच्छतीति च ब्रह्मणो जगद्रूपतया विक्रियमाणेऽपि तत्प्रकारभूता
चिदंशगतासर्वविकारास्तत्प्रकारभूतदोषत्रयगताश्चापुरुषार्थाइति विवेकं ब्रह्मप्रकृतिपुरुषयोर्ब्रह्मशरीरभूतयोस्तदानीं तथा
निर्देशानर्हतासूक्ष्मदशापत्त्या ब्रह्मणैकीभूतयोरपि भेदेनव्यपदेशः तदात्मानं स्वयमकुरुतेत्येवमादिभिरकार्षीत्तपोऽतप्यत
इत्यनेन सोभिध्यायशरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः अपएवससर्जादौ तासु वीजमपासृजदिति प्रतएव ब्रह्मणो निर्देशवत्
निर्विकारत्वश्रुतयश्चोपपन्नाः अतोब्रह्मैव जगतो निमित्तमुपादानं च श्रीयोनिश्चहि गीयतेश्रीतश्चजगतो निमित्तमुपादानं
च ब्रह्म यस्माद्योनित्वेनाभिधीयते कर्त्तारमीक्षतेरुं पुरुषं ब्रह्मयोनिमिति यद्भूतयोनिं परिपश्यन्तीति धीरास्तिधीरादिशब्दश्चो
पादानवचनश्चेति यथोर्णनाभिस्सृजतेगृह्णातेचेति वाक्यशेषादवगम्यते श्रीएतेनसर्वेव्याख्याताव्याख्याताः श्रीएते
नैवतुयोनिन्यायकलापेन सर्ववेदान्तेषु जगत्कारणप्रतिपादनपरास्सर्ववाक्यशेषाश्चेतनाचेतनविलक्षणा
त्पुरुषात्प्रकृतिब्रह्मप्रतिपादनपरा व्याख्याताव्याख्याताइति पदाभ्यासोऽध्यायपरिसमाप्तिद्योतनार्थः इतिश्रीभ
गवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये प्रथमस्याध्यायस्य चतुर्थः पादः समाप्तश्चाध्यायः श्रीरामायनमः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham